॥ श्री ॥
अथ श्री त्रिविक्रमपंडिताचार्यसुत श्री नारायणपंडिताचार्यविरचित:
॥ श्री मध्वविजय: ॥
६. षष्ठ: सर्ग:
ऐतरेयमथ किंचन सूक्तं सूचयन सदसि तत्र गरिष्ठ: ।
श्रोतुमिच्छति सभा भगवद्भ्य: सूक्तभावमिति तावदुवाच ॥ ६.१ ॥

वर्णसौष्ठवगरिष्ठमतूर्णं तुल्यमात्रमतिमात्रसुलक्ष्म ।
व्यूड हृज्जलद घोषममुष्यो च्चारणं विदधदभ्यधितार्थम ॥ ६.२ ॥

लक्षणान्विततया वचनेऽस्मिन देवतागुरुमसावतिशेते ।
मानमित्यपि विधाय धिया ते तत्त तु सूक्तमपरार्थमवोचन ॥ ६.३ ॥

स्यात तथेत्थमपि संभविताऽर्थ: त्र्यर्थतां श्रुतिषु वित्त दशार्थम ।
भारतं ननु शतार्थमपि स्याद वैष्णवं पदसहस्रतयं हि ॥ ६.४ ॥

इत्युदीरयति विस्तृतचित्ते भूसुरा इह जिगीषव ऐनम ।
ऊचुरर्थशतकं हरिनाम्नां वर्ण्यतामिति सहासमुखास्ते ॥ ६.५ ॥

वर्णयामि तदहं सकलं व: सौष्ठवादनु वदंतु भवंत: ।
तं वदंतमिति तेऽथ वदंतो बाढमित्यतिदृढोद्यममापु: ॥ ६.६ ॥

प्रत्ययप्रकृतिसंगमभंगीं शब्दशास्त्रविहतांप्रतिदर्श्य ।
शुद्धधी: श्रुतिशिर: शतसिद्धान अभ्यधात सपदि विश्वपदार्थन ॥ ६.७ ॥

यावदर्थशतकं न विशंक: संततोक्तिकृदपूपुरदेष: ।
वर्णितावधृति दुर्बल चित्ता: तावदाकुलहृदो ह्यभवंस्ते ॥ ६.८ ॥

सांगवेदचतुरा इतिहासे शिक्षिता: सुबहवोऽप्यतिधृष्टा: ।
नैतदीरितमहो जगृहुस्ते विश्वसंक्षयपयोऽंधुगणा वा ॥ ६.९ ॥

देवतास्वसुलभ प्रतिभा ते मानुषेषु चपलेषु कथा का ।
क्षाम्य सौम्य सकलज्ञ नमस्ते ते ब्रुवंत इति तं किल नेमुः ॥ ६.१० ॥

वेदशास्त्रचतुरैरिह विद्यावित्तलिप्सुभिरवाप्तमशेषैः ।
प्राप केरळसुमंडलजातैः अन्यदायतनमायतचेताः ॥ ६.११ ॥

तर्कतंत्रकुशलानपि पुंसः चर्करीति बत सोऽयममानान ।
मानमानमयतीह कथं नो नैष मंडलभुवां समितानाम ॥ ६.१२ ॥

मंत्रयंत इति ते द्विजवर्याः अन्यदेशजमुखस्तमपृच्छन ।
सह्ृदाददसुशंसननिंदाकारिसूक्तगतमर्थमुपेत्य ॥ ६.१३ ॥

तं स्फुटं प्रकथयन स पृणीयाच्चब्दमूलमवदत पृण धतुम ।
तं जिगीषुमथ विप्रमदः प्रीधातुमेष निगदंतमुवाच ॥ ६.१४ ॥

प्रादिभेदमविदन गुणय त्वं मूढ पांसुषु लिखन लिपिसंघम ।
भत्सयन्निति जहास सुहासो मत्सराकुलधियो जडयन सः ॥ ६.१५ ॥

तत प्रसंगबलतोऽखिलविद्यापाटवं पृथः ह्रदः प्रतिबुद्ध्य ।
आनमन सबहुमानममी तं यं नमंति किल नाकिनिकायाः ॥ ६.१६ ॥

कन्यकादृतसुरेंद्रवपुः श्रीदानवाचिवरसूक्तह्रदुक्तौ ।
कुत्रचित सदसि तावदपाला कीर्तिताऽतितरुणीत्ययमूचे ॥ ६.१७ ॥

श्वित्रिणी भवति तत्पदवाच्येत्याग्रहेण वदतोऽविदुषोऽत्र ।
कश्चिदेष्यति विपश्चिदिहैनं पृच्छतेत्ययमगच्छदथोक्त्वा ॥ ६.१८ ॥

देशमेनमचिरादुपयातः तादृशाकृतिरहो कृतबुद्धिः ।
तांस्तथाऽभ्यधित तत्पदभावं सूरिमौलिमणिनाऽत्र यथोचे ॥ ६.१९ ॥

केवलं न सकलाः श्रुतिविद्याः मानपूर्वकसमस्तगिरोऽस्य ।

अप्यनागतगतप्रतिपत्तिं श्रद दधुः पृथलचेतस ऐते ॥ ६.२० ॥

यद्यदेव सपदि प्रकृतं स्यात तत्तदेष यदवेदखलं च ।
सर्वदा सदसि सर्वबुधानां सर्वविद्यतिरिति प्रथितोऽभूत ॥ ६.२१ ॥

अप्रयातमपि देशमशेषं व्यानशे सुजनकैरवबंधुः ।
पूर्णदृक प्रततया निजकीर्त्या पूर्णचंद्र इव चंद्रिकयाऽलम ॥ ६.२२ ॥

सुंदरेषु सुरमंदिरवृंदेष्विंदिरारमणवंदनकृत्यम ।
आचरन्नसुचिरात सुविचारो रूप्यपीठपतिमाप मुकुंदम ॥ ६.२३ ॥

भूसुरप्रवरबुद्धिसमृद्धिव्यक्तयुक्तवपुषं रुचिरांगीम ।
सूत्रदीप्तमणिमालिकयाऽलं भूषितां भवनभूषणभताम ॥ ६.२४ ॥

पादसुंदरपदक्रमभावैः भासितांप्रकटवर्णगुणाढ्याम ।
भारतोत्तमभृतामनुरूपाच्छादनां समधिकस्वर शोभम ॥ ६.२५ ॥

राजसूयमुखसन्मखवृत्तां वासुदेवगुणनिष्ठितभावाम ।
सर्वधर्मपरिशिक्षणदक्षां वंदितां जनतया जननीवत ॥ ६.२६ ॥

मौलिसंग्रहविकर्षणदूनां मायिना सदसि दुष्टजनेन ।
न्यायमार्गमपहाय महांतं स्वेश्वरत्वमपि साधयताऽलम ॥ ६.२७ ॥

सज्जनैः कतिपयैरतिदीनैः चालितैः कलिबलाच्छभमार्गात ।
अप्युपेक्षितविकर्षणदुःखां सातिशोकमपि कैश्चन दृष्टाम ॥ ६.२८ ॥

वासुदेव धरणीधर नाथेत्युच्चकैरपि मुहुः प्रवदंतीम ।
पूर्णसद्गुणमजं गतदोषं बिभ्रतीं हृदि विविक्तमशेषात ॥ ६.२९ ॥

वार्यतां बुधजनैर्नन्तु हाहा नैष धर्म इति चाभिदधनाम ।
कृष्णलाळिततमामनवद्यां अप्यनन्यशरणां शरणोत्काम ॥ ६.३० ॥

वेदिजामिव पुरा भरताग्र्यः स स्वयं श्रुतिततिं खलु दृष्ट्वा ।
पुष्टबुद्धिरकरोत करुणाब्धिः दुष्टपक्षदमनस्थिरसंधाम ॥ ६.३१ ॥

अव्ययं सततमप्युपभक्त्या वित्तमग्र्यमिव दूरयियासुः ।
ज्यायसे सगुरवे हरिगीताभाष्यमेष विरचय्य तदाऽदात ॥ ६.३२ ॥

हेतुवादिनि विशंकटबुद्धौ तीर्थमर्थयति गंतुमनुज्ञाम ।
तां दिदेश पुरुषोत्तमतीर्थः चिंतयन स पुरुषोत्तम रक्षाम ॥ ६.३३ ॥

नीरजा मलयमंडलवृत्त्या श्लाघितो भुवि सदाळ्यनुयातः ।
साधुपांथपरितापमपास्यनुत्तरां दिशमयान्मरुदंशः ॥ ६.३४ ॥

बुद्धिशुद्धिकरगोनिकराढ्यं तीर्थजातमुभयं च धरण्याम ।
आत्ममज्जनत ऐव निकामं पर्यशोधयदमंदमनीषः ॥ ६.३५ ॥

वासुदेवपदसंततसंगी तेजसाऽप्यलमधः कृतशर्वः ।
अत्यवर्तत नितांतमथासौ गांगमोघमघनाशनकीर्तिः ॥ ६.३६ ॥

तत्र तत्र स जगत्त्रयचित्रं कर्म शर्मदमनुस्मृतिमात्रात ।
संचरन विदधदाप नराणां गोचरं बदरिकाश्रमपार्श्वम ॥ ६.३७ ॥

मंडयन भरतखंडमखंडं नादिरायणपदोऽत्र परो यः ।
तं नमन प्रचुरधीर्हरिगीताभाष्यमार्पयदुपायनमस्मै ॥ ६.३८ ॥

प्रीतयेऽस्य पुरतो वरभाष्यं वाचयन स जनतामपसार्य ।
वच्मि शक्तित उरुक्रमगीताभष्यामित्यकथयत पुरुसंख्यः ॥ ६.३९ ॥

ऐतदर्थमतिसूक्ष्ममपि त्वं शक्त ऐव न यदात्थ समस्तम ।
तेन लेशत इतीह पदं स्याद इत्यगद्यत जगज्जनकेन ॥ ६.४० ॥

www.yousigma.com

तेन तत्प्रवचने विहतेऽलं शुश्रुवुः प्राशयिता अपि शिष्याः ।
उच्यतामिति मुहुः सपृथिव्यास्फालनं पदमहो हरिणोक्तम ॥ ६.४१ ॥

शब्दभेदमवधर्य तमर्चासन्निषण्णवपुषः परमस्य ।
तस्य भावविदमंदमनीषः प्रोत्थितः प्रवचनं व्यधितैभ्यः ॥ ६.४२ ॥

मज्जनं व्यधित शीतळगंगावारि नित्यमरुणोदयकाले ।
यत स्पृशंति न नरा हिमभीता अंश ऐष पृषतामधिपस्य ॥ ६.४३ ॥

काष्ठमौनमदधादुपवासं शुद्धमप्यकृत शुद्ध हृदिच्छन ।
नित्यतुष्टहरितोषविशेषं चिंतयन प्रभुमनंतमठांतः ॥ ॥ ६.४४ ॥

प्रैरयत स्वचरणे रतचित्तं मध्वमत्र दिनमंडलमेनम ।
स्वाश्रमोपगमनाय मुकुंदो दीप्तिदृष्टिविदितागतिरन्यैः ॥ ६.४५ ॥

नक्तमेव भगवत्युपयाते प्रोदिते सति सहस्रमरीचौ ।
मौनवानलिखदुत्तमचित्तः शिष्यशिक्षणपरः करुणावान ॥ ६.४६ ॥

नेदृशं स्थळमलं शमलघ्नं नास्य तीर्थसलिलस्य समं वाः ।
नास्मदुक्तिसदृशं हितरूपं नास्ति विष्णुसदृशं ननु दैवम ॥ ६.४७ ॥

याति तावदधुनैव जनोऽयं व्यासरूपमजितं प्रदिदृक्षुः ।
आव्रजेदिह न वा स हि वेद स्वस्ति वोऽस्त्विति ययावथ मध्वः ॥ ६.४८ ॥

नाथ नाथ बत नोऽत्र विनाथान मा त्यजोरुकरुणो भगवंस्त्वम ।
नोदितं स्मृतमपीति हि शिष्यैः स्वामिनोऽभिमतभंगभयेन ॥ ६.४९ ॥

सद्गुरोर्न विरहं सहमानः सत्यतीर्थयतिरन्वगमत तम ।
यस्त्रिवारमितरासुतशाखास्वर्थमग्र्यमाशृणोत पुरुसंख्यात ॥ ६.५० ॥

दुर्गमार्गगतमप्यनुधवन नाऽप सोऽयमरुणीभवतीने ।

लीलया सजवमाक्रममाणं व्याश्रयांतरसुदूरशिलासु ॥ ६.५१ ॥

आनिवृत्तवपुषा गुरुणाऽऽरात पाणिना ह्यभिनयेन सुनुन्नः ।
त्रस्तधीरतिययौ स मुहूर्तात तद्दिनोपगतमार्गमशेषम ॥ ६.५२ ॥

आश्रमे निजजनानिह दृष्ट्वा तं प्रसादमहिमानममुष्य ।
प्रोच्य तत्प्लवनमप्यतिचित्रं तस्य तैः सह सदाऽस्मरदेषः ॥ ६.५३ ॥

वानरेंद्र इव वायुजवोऽसौ भीमसेन इव दानवभीमः ।
उल्ललास गिरिपुंगवशृंगे स व्रजन वअजिननाशननामा ॥ ६.५४ ॥

बहुसत्त्वगणं सविकं समहाविषमोक्षमहाहिमवंतमयम ।
विषमोक्षमहाहिमवंतमयन नगमैक्षत फुल्लदृगस्तभयः ॥ ६.५५ ॥

सुहसितकमलाकरोपगूढं सुजनसुखार्थमनंतभोगशय्यम ।
विकसितसुमनोघटागमुच्चं मरतकरत्नमयस्थलाग्र्यशोभम ॥ ६.५६ ॥

पादोपांतनमन्महामुनिगणं हेमप्रदीप्तांबरं श्रीमद्रत्नकलापमग्र्यकटकैर्विभ्राजितं हाटकैः
।
दृष्ट्वातं धरणीधरं सुवनमालोल्लासिनं सुंदरं स्वानंदाकृतिमस्मरन्मुररिपुं
स्वानंदतीर्थस्तदा ॥ ६.५७ ॥

॥ इति श्रीमत्कविकुलतिलक त्रिविक्रमपंडिताचार्यसुत
नारायणपंडिताचार्यविरचिते श्रीमध्वविजये
आनंदांकिते षष्ठः सर्गः ॥